|| ॐ नमो भगवते वासुदेवाय ||

# श्रीमद् भागवत रसिक कुटुंब

## भज गोविंदम्

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# भज गोविंदम्

भज गोविन्दं(म्) भज गोविन्दं(ङ्),
गोविन्दं(म्) भज मूढमते।
सम्प्राप्ते सन्निहिते काले,
नहि नहि रक्षति डुकृङ्करणे ॥1॥

मूढ जहीहि धनागमतृष्णां(ङ्),
कुरु सद्बुद्धिम् मनसि वितृष्णाम्।
यल्लभसे निजकर्मोपात्तम्,
वित्तं(न्) तेन विनोदय चित्तम् ॥2॥

नारीस्तनभरनाभीदेशं(न्),
दृष्ट्वा मा गा मोहावेशम्।
एतन्मां(व्)सवसादिविकारं(म्),
मनसि विचिन्तय वारं(म्) वारम् ॥3॥

नलिनीदलगतजलमतितरलं(न्),
तद्वज्जीवितमतिशयचपलम्।
विद्धि व्याध्यभिमानग्रस्तं(म्),
लोकं(म्) शोकहतं(ञ्) च समस्तम् ॥4॥

यावद्वित्तोपार्जनसक्तस्-
तावन्निजपरिवारो रक्तः।
पश्चाज्जीवति जर्जरदेहे,
वार्तां(ङ्) कोऽपि न पृच्छति गेहे ॥5॥

यावत्पवनो निवसति देहे,
तावत् पृच्छति कुशलं(ङ्) गेहे।
गतवति वायौ देहापाये,
भार्या बिभ्यति तस्मिन्काये ॥6॥

बालस्तावत् क्रीडासक्त-
तरुणस्तावत् तरुणीसक्तः।
वृद्धस्तावच्चिन्तासक्तः(फ्),
परमे ब्रह्मणि कोऽपि न सक्तः ॥7॥

का ते कांता कस्ते पुत्रः(स्),
सं(व्)सारोऽयमतीव विचित्रः।
कस्य त्वं(म्) कः कुत आयातस्-
तत्त्वं(ञ्) चिन्तय तदिह भ्रातः ॥8॥

सत्सं(ङ्)गत्वे निस्सं(ङ्)गत्वं(न्),
निस्सं(ङ्)गत्वे निर्मोहत्वम्।
निर्मोहत्वे निश्चलतत्त्वं(न्),
निश्चलतत्त्वे जीवन्मुक्तिः ॥9॥

वयसि गते कः(ख्) कामविकारः(श्),
शुष्के नीरे कः(ख्) कासारः।
क्षीणे वित्ते कः(फ्) परिवारः,
ज्ञाते तत्त्वे कः(स्) सं(व्)सारः ॥10॥

मा कुरु धनजनयौवनगर्वं(म्),
हरति निमेषात्कालः(स्) सर्वम्।
मायामयमिदमखिलम् हित्वा,
ब्रह्मपदम् त्वं(म्) प्रविश विदित्वा ॥11॥

दिनयामिन्यौ सायं(म्) प्रातः(श्),
शिशिरवसन्तौ पुनरायातः।
कालः(ख्) क्रीडति गच्छत्यायुस्-
तदपि न मुञ्चत्याशावायुः ॥12॥

का ते कान्ता धनगतचिन्ता,
वातुल किं(न्) तव नास्ति नियन्ता।
त्रिजगति सज्जनसं(ङ्)गतिरेका,
भवति भवार्णवतरणे नौका ॥13॥

द्वादशमञ्जरिकाभिरशेषः(ख्),
कथितो वैयाकरणस्यैषः।
उपदेशोऽभूद्विद्यानिपुणैः(श्),
श्रीमच्छंकरभगवच्चरणैः ॥14॥

जटिलो मुण्डी लुञ्छितकेशः(ख्),
काषायाम्बरबहुकृतवेषः।
पश्यन्नपि च न पश्यति मूढो,
ह्युदरनिमित्तं(म्) बहुकृतवेषः ॥15॥

अङ्गं(ङ्) गलितं(म्) पलितं(म्) मुण्डं(न्),
दशनविहीनं(ञ्) जातं(न्) तुण्डम्।
वृद्धो याति गृहीत्वा दण्डं(न्),
तदपि न मुञ्चत्याशापिण्डम् ॥16॥

अग्रे वह्निः(फ्) पृष्ठे भानुः,
रात्रौ चुबुकसमर्पितजानुः।
करतलभिक्षस्तरुतलवासस्-
तदपि न मुञ्चत्याशापाशः ॥17॥

कुरुते गङ्गासागरगमनं(म्),
व्रतपरिपालनमथवा दानम्।
ज्ञानविहीनः(स्) सर्वमतेन,
मुक्तिं(न्) न भजति जन्मशतेन ॥18॥

सुरमंदिरतरुमूलनिवासः(श्),
शय्या भूतलमजिनं(म्) वासः।
सर्वपरिग्रहभोगत्यागः(ख्),
कस्य सुखं(न्) न करोति विरागः ॥19॥

योगरतो वा भोगरतो वा,
सङ्गरतो वा सङ्गविहीनः।
यस्य ब्रह्मणि रमते चित्तं(न्),
नन्दति नन्दति नन्दत्येव ॥20॥

भगवद् गीता किञ्चिदधीता,
गङ्गाजललवकणिका पीता।
सकृदपि येन मुरारिसमर्चा,
क्रियते तस्य यमेन न चर्चा ॥21॥

पुनरपि जननं(म्) पुनरपि मरणं(म्),
पुनरपि जननीजठरे शयनम्।
इह सं(व्)सारे बहुदुस्तारे,
कृपयाऽपारे पाहि मुरारे ॥22॥

रथ्याचर्पटविरचितकन्थः(फ्),
पुण्यापुण्यविवर्जितपन्थः।
योगी योगनियोजितचित्तो,
रमते बालोन्मत्तवदेव ॥23॥

कस्त्वं(ङ्) कोऽहं(ङ्) कुत आयातः(ख्),
का मे जननी को मे तातः।
इति परिभावय सर्वमसारम्,
विश्वं(न्) त्यक्त्वा स्वप्नविचारम् ॥24॥

त्वयि मयि चान्यत्रैको विष्णुर्-
व्यर्थं(ङ्) कुप्यसि मय्यसहिष्णुः।
भव समचित्तः(स्) सर्वत्र त्वं(म्),
वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥25॥

शत्रौ मित्रे पुत्रे बन्धौ,
मा कुरु यत्नं(म्) विग्रहसन्धौ।
सर्वस्मिन्नपि पश्यात्मानं(म्),
सर्वत्रोत्सृज भेदाज्ञानम् ॥26॥

कामं(ङ्) क्रोधं(म्) लोभं(म्) मोहं(न्),
त्यक्त्वाऽऽत्मानं(म्) भावय कोऽहम्।
आत्मज्ञानविहीना मूढास्-
ते पच्यन्ते नरकनिगूढाः ॥27॥

गेयं(ङ्) गीतानामसहस्रं(न्),
ध्येयं(म्) श्रीपतिरूपमजस्रम्।
नेयं(म्) सज्जनसङ्गे चित्तं(न्),
देयं(न्) दीनजनाय च वित्तम् ॥28॥

सुखतः(ख्) क्रियते रामाभोगः(फ्),
पश्चाद्धन्त शरीरे रोगः।
यद्यपि लोके मरणं(म्) शरणं(न्),
तदपि न मुञ्चति पापाचरणम् ॥29॥

अर्थमनर्थं(म्) भावय नित्यं(न्),
नास्तिततः(स्) सुखलेशः(स्) सत्यम्।
पुत्रादपि धनभाजां(म्) भीतिः(स्),
सर्वत्रैषा विहिता रीतिः ॥30॥

प्राणायामं(म्) प्रत्याहारं(न्),
नित्यानित्य विवेकविचारम्।
जाप्यसमेतसमाधिविधानं(ङ्),
कुर्ववधानं(म्) महदवधानम् ॥31॥

गुरुचरणाम्बुजनिर्भरभक्तः(स्),
संसारादचिराद्भव मुक्तः।
सेन्द्रियमानसनियमादेवं(न्),
द्रक्ष्यसि निजहृदयस्थं(न्) देवम् ॥32॥

